यथा। यद्यपि पापस्य कार्य्यानन्वितत्वेन तत्सत्तायामप्रामाण्यं प्रतिभाति। इति प्रायश्चित्ततत्त्वम्॥ साधुता। सतो भाव इत्यर्थे सच्छब्दात् तप्रत्ययेन निष्पन्ना॥

सत्त्रं, क्ली, (सतः साधून् त्रायते इति। त्रै+कः। यद्वा, सीदन्ति सज्जना यत्र। सद गतौ+ "गुधृवीपचिवचीति।" उणा० ४।१६६। इति त्रः।) यज्ञः। (यथा, मनुः। ८। ३०३।

"अभयस्य हि यो दाता संपूज्यः सततं नृपः।
सत्त्रं हि वर्द्धते तस्य सदैवाभयदक्षिणम्॥")

सदादानम्। आच्छादनम्। अरण्यम्। (यथा, किराते। १३। ९।

"अयमेव मृगव्यसत्त्रकामः
प्रहरिष्यन् मयि मायया समस्थे।
पृथुभिर्ध्वजिनीरवैरकार्षीत्
चकितोद्भ्रान्तमृगाणि काननानि॥")

कैतवम् इति मेदिनी॥ (यथा, महाभारते। ४। ३६। ३८।

"सत्त्रेण नूनं छन्नं हि चरन्तं पार्थमर्ज्जुनम्।
उत्तरः सारथिं कृत्वा निर्य्यातो नगरात्
बहिः॥")

धनम्। गृहम्। दानम् सरोवरम्। इत्यनेकार्थकोषः॥ यागविशेषः। यथा,—

"नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः।
सत्त्रं स्वर्गाय लोकाय सहस्रसममासत॥
कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयम्।
आसीना दीर्घसत्त्रेण कथायां सक्षणा हरेः॥"
इति श्रीभागवते १ स्कन्धे १ अध्यायः॥ * ॥

द्वादशाहसाध्यसत्त्रं यथा। ज्योतिष्टोमे द्वादशगोशतदक्षिणाविभागः षोड़शर्त्विजां तद्विकृतीभूते सत्त्रात्मके द्वादशाहसाध्ये शतेनाह्निनो दीक्षयन्तीत्यादिदर्शनेन निर्णीयते। तत्र सावनमानेन कर्त्तव्यम्। यथा,—

"सत्त्राण्युपास्यान्यथ सावनेन
लोकस्य यत् स्याद्व्यवहारमर्म्म!"
इति मलमासतत्त्वम्॥*॥

सदक्षिणं सततान्नदानम्। तन्निन्दकस्पर्शनादिनिषेधो यथा,—

"नालपेज्जनविद्विष्टान् वीरहीनां तथा स्त्रियम्।
देवतापितृसच्छास्त्रयज्ञसत्त्रादिनिन्दकैः।
कृत्वा तु स्पर्शनालापं शुद्ध्यतेऽर्कावलोकनात्॥"
इति मार्कण्डेयपुराणे सदाचाराध्यायः॥

सत्त्रं सदक्षिणं सततान्नदानम्! इति तट्टीका॥

सत्त्रं, [म्], व्य, सह। इति शब्दरत्नावली जटाधरश्च॥

सत्त्रशाला, स्त्री, (सत्त्रस्य शाला।) अन्नादिदानगृहम्। तत्पर्य्यायः। प्रतिश्रयः २। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे। २१। ७४।

"ततः सा सत्त्रशालान्तः प्रविवेश वणिक्सुता।
अन्वगात् राजपुत्त्रोऽपि स तां गुप्तमवेक्षितुम्॥"

सत्त्रा, व्य, सह। इत्यमरः॥

सत्राजित्, पुं, राजविशेषः। स तु श्रीकृष्णस्य श्वशुरः। परे भल्लाटनगरे शशिध्वजराजो बभूव। इति कल्किपुराणे २७ अध्यायः॥

सत्त्रिः, पुं, मेघः। हस्ती। जयशीले, त्रि। इत्युणादिकोषः॥

सत्त्रिजातकं, क्ली, (सत् साधु त्रिजातकं तुल्यत्वगेलापत्रादिकं यत्र।) व्यञ्जनविशेषः। यथा,—

"मांसं कटुघृते भृष्टं शिक्ता चोष्णाम्बुना
मुहुः।
जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते।
तदेव घृततक्राढ्यं प्रदिग्धं सत्त्रिजातकम्॥"
इति शब्दचन्द्रिका॥

सत्त्री, [न्] पुं, (सत्त्रमस्त्यस्येति। इनिः।) गृहपतिः। इत्यमरः॥ द्वे गृहस्थे। सत्त्रं सदा दानं विद्यतेऽस्य सत्त्री इन्। सदेस्त्रं सत्त्रं हितकारम्। सत्त्रमाच्छादने,यज्ञे सदा दाने च कैतवे। इति विश्वः। गृहस्य पतिर्गृहपतिः। इति भरतः॥ नित्यप्रवृत्तान्नदानः। यथा विष्णुः। नाशौचं राज्ञां राजकर्म्मणि न व्रतिनां व्रते न सत्त्रिणां सत्त्रे न कारूणां स्वकर्मणि न राजाज्ञाकारिणां तदिच्छया न देवप्रतिष्ठाविवाहयोः पूर्व्वसंवृतयोः। इति। सत्त्रिणां नित्यप्रवृत्तान्नदानानां सत्त्रेऽन्नदाने। इति शुद्धितत्त्वम्॥ (यज्ञान्विते, त्रि। यथा,महाभारते।१४।७।३।

"सत्यमेतद्भवानाह स मां जानाति सत्त्रिणम्।
कथयस्व तदेतन्मे क्व नु सम्प्रति नारदः॥")

सत्त्वं, क्ली, (सतो भावः। सत्+त्व।) प्रकृतेर्गुणविशेषः। अत्र सत्त्वं प्रकाशकज्ञानं सुखहेतुः। सतो भावः सत्त्वम्। त्वतौ भावे इति त्वं निपातनात्तलोप इति केचित्। सत्त्वं हितकारमिति बहवः। इत्यमरभरतौ॥ * ॥ (यथा, मनुः। १२। २४।

"सत्त्वं रजस्तमश्चैव त्रीन् विद्यादात्मनो गुणान्।
यैर्व्याप्येमान् स्थितो भावान् महान् सर्व्वानशेषतः॥")

महाभारतमते सुखजनकगुणः। तस्य धर्म्माः। प्रसादः १ हर्षः २ प्रीतिः ३ असन्देहः ४ धृतिः ५ स्मृतिः ६। इति मोक्षधर्म्मः॥ द्रव्यम्। असुः। (यथा, रामायणे। २। ६०। १।

"ततो भूतोपसृष्टेव वेपमाना पुनः पुनः।
धरण्यां गतसत्त्वेव कौशल्या सूतमब्रवीत्॥)"

व्यवसायः! इत्यमरः॥ पिशाचादिः। (यथा, रामायणे। २। ३३। १०।

"अद्य नूनं दशरथः सत्त्वमाविश्य भाषते।
न हि राजा प्रियं पुत्त्रं विवासयितुमर्हति॥")

बलम्। (यथा, रघुः। ४। ७२।

"शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसम्भ्रमम्।
गुहाशयानां सिंहानां परिवृत्त्यावलो-
कितम्॥")

स्वभावः। (यथा, किराते। १२। ३९।

"सत्त्वविहितमतुलम्भुजयो-
र्बलमस्य पश्यत मृधेऽधिकुप्यतः॥")

आत्मा। चित्तम्। इति मेदिनी॥ रसः। आयुः। इति धरणिः॥ कुबेरः। इति हेमचन्द्रः॥ धनम्। आत्मता। इति शब्दरत्नावली॥

सत्त्वः, पुं, क्ली, (सत्त्वमस्त्यस्येति। अर्शआदित्वादच्।) जन्तुः। इत्यमरः॥ (यथा, रघुः। २। ८।

"रक्षापदेशान्मुनिहोमधेनो-
र्वन्यान् विनेष्यन्निव दुष्टसत्त्वान्॥")

सत्त्वता, स्त्री, सत्त्वस्य भावः। सत्त्वशब्दात् भावे तप्रत्ययानन्तरं आप्प्रत्ययेन निष्पन्ना॥

सत्त्वसम्पन्नः, त्रि, (सत्त्वं सम्पन्नः।) सत्त्वप्राप्तः। इति लोकप्रसिद्धिः॥

सत्त्वस्थः, त्रि, (सत्त्वे तिष्ठतीति। स्था+कः।) सत्त्ववृत्तिशाली। सत्त्वप्रधानः। यथा,—

"ऊर्द्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः
जघन्यगुणवृत्तस्था अधो गच्छन्ति तामसाः॥"
इति भगवद्गीतायाम्। १४। १८।

सत्पत्रं,क्ली, (सत्पत्रं यस्य।) पद्मस्य नवदलम्। इति शब्दचन्द्रिका॥

सत्पथः, पुं, (सन् पन्थाः। टच्।) प्रशस्तपथः। तत्पर्य्यायः। अतिपन्थाः २ सुपन्थाः ३ अर्च्चिताध्वा ४। इत्यमरः॥ सुपथः ५। इति शब्दरत्नावली॥ (यथा, भागवते। ४। १२। ५०।

"ज्ञानमज्ञाततत्त्वाय यो दद्यात् सत्पथेऽमृतम्
कृपालोर्दीननाथस्य देवास्तस्यानु गृह्णते॥")

सत्पशुः, पुं, (सन् पशुः।) यज्ञीयपशुः। इति केचित्॥ शोभनपशुश्च॥

सत्पुत्त्रः, पुं, (सन् पुत्त्रः।) उत्तमसन्तानः। वेदादिविहितपित्रादिकार्य्यकर्त्ता। यथा—

"पुन्नाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः।
मुखसन्दर्शनेनापि तदुत्पत्तौ यतेत सः॥"

इति बृहस्पत्युक्तनरकनिस्तारार्थाय ऋणमस्मिन् समन्नयति अमृतत्वञ्च विन्दति। इति पिता पुत्त्रस्य जातस्य पश्येच्च जीवतो मुखम्। इति वशिष्ठोक्तर्णापनयनाय च यत् पश्येदिति नियमविधानं तदकृतपुत्त्रकार्य्यपुत्त्रपरम्। सत्पुत्त्रस्तु मुखदर्शनं विनापि नरकनिस्तारकः। तथा च विष्णुपुराणम्।

"सत्पुत्त्रेण तु जातेन वेणोऽपि त्रिदिवं ययौ।
पुन्नाम्नो नरकात्त्रातः स तेन सुमहात्मना॥"

ब्रह्मपुराणेऽपि।

"समुत्पन्नेन भो विप्राः सत्पुत्त्रेण महात्मना।
त्रातः स पुरुषव्याघ्रः पुन्नाम्नो नरकात्तदा॥"
इति शुद्धितत्त्वम्॥

सत्पुरुषः, पुं, (सन् पुरुषः।) पूज्यमानपुरुषः। इति संक्षिप्तसारसमासपादः।(यथा, रामायणे। २। ४८। ८।

"एकः सत्पुरुषो लोके लक्ष्मणः सह सीतया।
योऽनुगच्छति काकुत्स्थं रामं परिचरन् वने॥)"

सत्प्रतिग्रहः,पुं, सद्भ्यः साधुभ्यः प्रतिग्रहो दानग्रहणम्। साधुजनदत्तद्रव्यग्रहणम्। यथा,—

"सप्तवित्तागमा धर्म्म्या दायो लाभः क्रयो जयः